with the degrees अंशसममंशशेषं···दिवसकरस्येष्टदिने कुर्वन्नावत्सराद्गणकः Brāhm-SphuSi. 18. 57.

**अंशसमारोप** ( aṁśa–samāropa ) *m.* superimposition of an aspect यावन्तोंऽशसमारोपास्तन्निरासे विनिश्चयाः । तावन्त एव शब्दाः PramāVā. 1. 51.

**अंशसमुदाय** ( aṁśa–samudāya ) *m.* a group or collection of particles or parts इन्द्रादीनां मात्राभ्योंऽशसमुदायेभ्योंऽशान् सारभूतान् निर्हृत्य निर्मितः ( नृपः ) VīraMi. (Rājanīti.) 16. 18.

**अंशसमुद्भव** ( aṁśa–samudbhava ) *adj.* born of a part only, a partial incarnation ते सर्वे सर्वभूतस्य विष्णोरंशसमुद्भवाः ViṣṇuP. i. 22. 20; विष्वक्सेन इति ख्यातो विष्णोरंशसमुद्भवः KūrmaP. 671. 15 (2. 31); वसुदेवसुतो तत्र विष्णोरंशसमुद्भवो BrahmP. 190. 11; दुर्वासा नाम भगवान् रुद्रस्यांशसमुद्भवः BhaviP. 125B. 3 (i. 72. 14)

**अंशसंभव** ( aṁśa–sambhava ) *adj.* [ *f.*–ā ] **A** born of a part or portion, a partial incarnation यस्यांशसंभवो ब्रह्मा रुद्रोऽपि परमेश्वरः KūrmaP. 246. 3 (1. 22); कुमारोऽसि···शंकरस्यांशसंभवः SkandP. I. i. 29. 67; यूयं सृजध्वं सर्वेऽपि वानरेष्वंशसंभवान् AdhyāRā. i. 2. 30; सा वेश्या म्लेच्छायाश्चांशसंभवा··· महाक्रोधमुपाययौ BhaviP. 520B. 14 (III. iii. 28. 55); **B** based on or calculated from the *navāṁśa* विलग्नपे बलोपेते शुभदुष्टेंऽशसंभवम् ( आयुः ) JātaPā. 5. 28; *m.* the possibility of (possessing) parts or divisions त्वन्मते गगनस्याप्यनित्यद्रव्यत्वेन स्वत एवांशसंभवाच्च Nyāyāmṛ. 351B. 9.

**अंशसंभूत** ( aṁśa–sambhūta ) *adj.* [ *f.* –ā ] **A** born or produced from a part or portion यत्तत्त्वमंशसंभूतं प्रादुर्भावान्तरं तु तत् PauṣkS. 36. 202; सर्वेषामपि मन्त्राणां देवताः···आवयोरंशसंभूताः समुद्दिष्टाः KulārT. 3. 13; **B** arising out of the *navāṁśa* लग्नात् कुजाष्टमो दोषो नाशयत्यखिलान् गुणान् । यथा लग्नांशसंभूतान् VasiS. 32. 60.

**अंशसंमित** ( aṁśa–sammita ) *adj.* measuring one unit or part (कुर्यात्) ओंकारावर्तरूपेण कुम्भं तस्यांशसंमितम् PauṣkS. 34. 29; स्तम्भमस्तकविश्रान्तं बाहुल्येनांशसंमितम् ( चक्रमापाद्य ) PauṣkS. 35. 43.

**अंशसर्ग** ( aṁśa–sarga ) *m.* creation from a part, partial manifestation स्वैरं स्वैरंशसर्गैर्गहनतममहामोहहार्दं हरन्ती ( पार्वती ) DevīS'. 39 (comm. अवयवप्रादुर्भावैः )

**अंशसवर्णन** ( aṁśa–savarṇana ) *n.* reduction of fractions, equalization of fractions आदावंशसवर्णनम् Līlā. 29.

**अंशसाम्य** ( aṁśa–sāmya ) *n.* equality of parts अंशसाम्यं सर्वत्र BālamBha. ii. 140. 20 (*on* 2. 167)

**अंशसिद्धि** ( aṁśa–siddhi ) *f.* partial establishment of a proposition; the existence of the *sādhana* in a part of the *pakṣa* असिद्धयोंऽशसिद्धेश्च विविच्यन्ते शताधिकाः NyāyPari. 280. 3.

**अंशस्थिति** ( aṁśa–sthiti ) *f.* existence of a part or portion अंशस्थितावपि परिणाम एव तिष्ठेन्न त्वात्मा IṣṭaSi. 88. 8.

**अंशस्फुट** ( aṁśa–sphuṭa ) *n.* the true degree of the planet इष्टं स्फुटं दिविचरं नवभिर्गुणयेद् विशेषयेत् क्रमशः । मण्डलहृतावशिष्टं तस्यैवांशस्फुटं समानं तत् HorāSā. 32. 12.

**अंशस्वर** ( aṁśa–svara ) *m.* the key-note, the chief note in a *rāga* दूरस्थाभाषणे कर्तव्ये शिरःस्थाने षड्जपञ्चमयोरन्यतरस्थायिस्वराश्रयेण अंशस्वरविभागचतुश्चतुष्कसंमिश्रं कर्तव्यम् AbhinBhā. ii. 398. 16 (*on* 17. 130); सर्वजातिषु जानीयादंशस्वरगतं रसम् SaṅgīRa. I. i. 7. 112; रागाणां जीवभूता ये प्रोक्तास्तेंऽशस्वरा बुधैः SaṅgīPā. 300.

**अंशहत** ( aṁśa–hata ) *adj.* multiplied by the numerator of the fraction अंशहतं दिनमानं छेदविभक्तं दिनांशके जाते GaṇiSāSaṁ. 8. 10.

**अंशहर** ( aṁśa–hara ) *m.* [P. iii. 2. 9 enjoins *ac* which excludes *vṛddhi* in senses other than the physical act of lifting, *aṁśa-hara*, CāndraVṛ. *on* i. 2. 3; JaineVyā. ii. 2. 14; Kātan. iv. 3. 11; KāśiVṛ. *on* iii. 2. 9; PrakriKau. ii. 513. 2; SiddhāKau. 492A. 9]; **A** one who takes a share and hence responsible for good or bad acts ये च रक्षासहायाः स्युः पार्थिवानां युधिष्ठिर । ते चैवांशहराः सर्वे धर्मे परकृतेऽनघ MahāBhā. xii. 66. 28; विभूतिमानंशहरैर्विहीनः Rāvaṇā. 10. 3; चक्रिराजानकाद्या वा स्थिता अंशहरा इतः RājTa.(Prā.) 450; **B** co-heir, coparcener पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः YājñaSm. 2. 132 = AgniP. 255. 19; 2. 133; यदा पुनरन्योदर्यः संसृष्टी न सोदरश्चेत्तदा कोंऽशहर इत्यपेक्षायामाह Aparā. 748. 17 (*on* 2. 138); यो विभागकाले गर्भो न विज्ञातः पश्चात् स्वजातीयभार्यायां जातः स सर्वेभ्योंऽशहरेभ्यः सकाशादंशं हरेत् DīpKa. 55. 15 (*on* 2. 122); एतेषां क्रमोपदिष्टानामौरसादीनां पुत्राणां पूर्वाभावे परः परः पिण्डदोंऽशहरश्च प्रत्येतव्यः BālaKrī. i. 248. 23 (*on* 2. 136)

**अंशहरण** ( aṁśa–haraṇa ) *n.* taking away the share of the property, title for a share in the inheritance अत एव स्मृत्यन्तरे निर्धनमातृविषयमेवांशहरणं न मातृमात्रविषयमेव ज्ञायते SmṛtiCan. iv. 624. 13; अंशहरणस्य रागतः प्राप्तेः CaturCin. III. i. 789. 11; पिण्डदानादौ तस्यैवाधिकारो नांशहरणप्रयुक्तोऽन्यस्य BālamBha. ii. 229. 26 (*on* 2. 135)

**अंशहरत्व** ( aṁśahara–tva ) *n.* the status of a coheir, coparcener or share-holder स्त्रियामंशहरत्वाभावे स्त्रीधनहर्तृनग्रे विवक्षुः स्त्रीधनस्वरूपं तावदाह Aparā. 751. 8 (*on* 2. 143); 433. 1 (*on* 1. 218); यदा पुनः संसृष्टित्वमन्योदर्यस्य तदा सोदरत्वमेवांशहरत्वे निमित्तं नेतरदिति Aparā. 748. 23; (*on* 2. 138); पिण्डदत्वांशहरत्वयोरैकाधिकरण्यमुक्तम् SmṛtiCan. v. 7. 14; न च···' सर्वत्रांशहरा माता ' इति शातातपवचने मातुरंशहरत्वोक्तेस्तस्या अपि देवतात्वमिति वाच्यम् VīraMi. (S'rāddha.) 9. 9; दत्तके सति पौत्रस्यांशहरत्वस्याप्यभावापत्तेः NirṇaSi. 271. 5; BālamBha. ii. 221. 18 (*on* 2. 135); ii. 174. 8 (*on* 2. 132); ii. 174. 9 (*on* 2. 132)

**अंशहान** ( aṁśa–hāna ) *n.* absence of parts, impartite nature परस्यैवाधियोगोऽतः कृत्स्नस्यैवांशहानतः । कस्य भेदः कुतश्चैवम् IṣṭaSi. 249. 12.

**अंशहानि** ( aṁśa–hāni ) *f.* decrease in the share of the property वर्णावरेष्वंशहानिरूढाजातेष्वनुक्रमात् NāraSm. 193. 14.

**अंशहारिता** ( aṁśa–hāritā ) *f.* [with Acc. and *gam*–] to take a share, to participate तदस्य यशसः पाण्डुसूनुसंहारजन्मनः । वीरोत्तंस न मे गन्तुं त्वमर्हस्यंशहारिताम् PāṇḍaC. 12. 346.

**अंशहारित्व** ( aṁśahāri–tva ) *n.* participation in a share (of inheritance or oblation) पार्वणे···मातुरंशहारित्वमस्ति SmṛtiCan. v. 99. 4; दायानर्हाणां तु दायहारित्वोक्तिर्विरुध्यते न पुनरंशहारित्वोक्तिः । अंशशब्दो हि भागवचनो न दायवचनः SmṛtiCan. iv. 623. 15.

**अंशहारिन्** ( aṁśa–hārin ) *adj.* [ *f.* –ṇī ] taking a share or portion न तु पित्रा स्वयमर्जितादंशादंशहारिणः ManvaVi. 1200. 8 (*on* 9. 165); कथं तर्हि··· मात्रादीनां पृथक्छ्राद्धानुष्ठानम् । अंशहारिणीनां पृथक्छ्राद्धाभावात् SmṛtiCan. v. 99. 17.

**अंशहृति** ( aṁśa–hṛti ) *f.* division of the numerator कृत्वा छेदांशकयोः कृतिकृतिमूले घनं च घनमूलम् । तच्छेदैरंशहृतौ वर्गादिफलं भवेद्भिन्ने GaṇiSāSaṁ. 2. 13.

**अंशांश** ( aṁśāṁśa ) *m.* **A** part by part, various parts अंशांशबलविकल्पातिबहुलत्वात् CaraS. iii.. 8. 137 (1941 Ed.); शेषा ये देवगन्धर्वाः···अंशांशैर्भाषितान् भावान्···दत्तवन्तः मत्सुतेभ्यः NāṭyS'ā. 1. 63; अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात् BhāvPra.(Bhā.) viii. 1. 11; **B** a portion of a portion, a very small part शेषाख्योंऽशस्ततो मम । अंशांशेनोदरे तस्याः सप्तमः संभविष्यति ViṣṇuP. v. 1. 73; यस्यांशांशेन सृज्यन्ते लोकाः BrahmāṇḍP. ii. 32. 29; रूप्यात्मा भाति योंऽशांशः IṣṭaSi. 269. 11; यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः BhāgP. i. 3. 5; BrahmP. 181. 39; DevīBhāP. iv. 2. 39; भजन्ति···परमात्मानमीश्वरं केचित्तदंशमंशांशम् PāñcaRā.(Nā.) i. 12. 47; iv. 2. 26; **C** a partial or secondary or subordinate incarnation चकार यानि कर्माणि···पुरुषोत्तमः । अंशांशेनावतीर्योर्व्यां तत्र तानि मुने वद ViṣṇuP. v. 1. 3; अंशांशास्ते देव मरीच्यादय एते BhāgP. iv. 7. 43; साक्षाद्देवः पिनाकधृक् । अंशांशेनाभवत्पुत्रो नाम्ना शुक इति KūrmaP. 335. 15 (1. 34); 218. 8 (1. 19); **D** part of a melody transferred to another melody रागान्तरस्यावयवो रागेंऽशः स च सप्तधा ।··· अंशांशश्चेति SaṁgīRa. ii. 177. 6 (3. 134); अंशेंऽशान्तरसंचारादंशांश इति कीर्तितः SaṁgīRa. ii. 178. 1 (3. 140)

**अंशांशक** ( aṁśāṁśaka ) *m.* **A** a part of a part, a very small part यस्यांशांशकभागेन विना सर्वं विलीयते PāñcRā.(Nā.) iv. 3. 208; **B** a fraction of a degree भास्करः । अंशांशकं तु मेदिन्यां मुहूर्तेनैव गच्छति BrahmāṇḍP. i. 21. 64; VāyuP. i. 50. 119; (v. l for त्रिंशांशकं तु मेदिन्याः ); **C** minor incarnations यत्र स्थितिप्रवृत्तस्य विष्णोरंशांशका नृपाः ViṣṇuP. iv. 24. 138; विष्णोरंशांशका ह्येते चत्वारो धर्मसूनवः SkandP. V. iii. 192. 10.

**अंशांशकला** ( aṁśāṁśa–kalā ) *f.* a fraction of a part of a part पराशरात् सत्यवत्यामंशांशकलया विभुः । अवतीर्णः BhāgP. xii. 6. 49; यस्याश्चांशांशकलया बभूवुर्देवयोषितः PāñcRā.(Nā.) ii. 3. 37.

**अंशांशकल्पना** ( aṁśāṁśa–kalpanā ) *f.* the relative strength of the different constituents or elements दोषाणां समवेतानां विकल्पोंऽशांशकल्पना AṣṭāHṛ. iii. 1. 10; = KośaKaTa. i. 7261; cf. पृथक्समवेतानां च दोषाणामंशांशबलविकल्पविशेषाद् व्याधेर्बलाबलविशेषः AṣṭāSaṁ. i. 119. 19 (1. 23)

**अंशांशतस्** ( aṁśāṁśa–tas ) *adv.* according to each one's share, share by share ( पुत्राः ) रिक्थाभावेऽप्यृणमंशांशतो दद्युः BālaKrī. i. 243. 5 (*on* 2. 121)

**अंशांशलव** ( aṁśāṁśa–lava ) *m.* a very small part of a part मे मनः । यस्यांशांशलवे विलीनमधुनानन्दात्मना निर्वृतम् ViveCū. 484.

**अंशांशविभागिन्** ( aṁśāṁśa–vibhāgin ) *adj.* possessing distinct individual parts, well-segmented (applied to conches) ये दृढाङ्गा सगुरवः तथां-